श्रीगणेशायनमः॥श्रीगुरुगणपतिवटुकसारदेवदेवता
१ भ्योनमः॥प्रातःप्रार्भृतीसायांतंसायांतंप्रातरंततः॥य
त्करोमिजगन्मातस्तदस्तुतवपूजनं॥१॥नचागुरुपदां
भोजस्साधकानंदहेतवे॥बालार्चनाविधिवक्ष्येसाधकस्यो
पदेशकः॥२॥अथसाधकः॥प्रातरुत्थायसुखासनेसमु
पविश्यस्वमूर्ध्निसहस्रदलंकमलेस्वगुरुध्यायेत्॥श्वेतं
श्वेतद्विनेत्रंसाम्बंवरदंचामरेश्वरनरकोरुकं॥बिभ्रा
२

प्रिययेतरेणतरसाश्लिष्टंप्रसन्माननं॥हस्ताभ्यांसभयं
वरंचदधतंशाभुस्वरूपंपरं॥हरात्मोहितरोचनीतलं
युगंध्यायेच्छिरस्थंगुरुं॥इतिध्यात्वा॥मानसोपचारैः
अर्च्य॥ततस्तोमुद्रीरयत्॥॥नमस्तेनाथभगवन्॥॥
इत्यादिश्लोकपंचकेनस्वावश्यमाणप्रकारेणहृद्
कमलेदेवतांध्यात्वा॥मानसोपचारैरभ्यर्चयेत्
॥अहंदेवोनचान्योस्मिब्रह्मैवाहंनशोकभाक्॥सच्चि

दानंदरूपोहंनित्यमुक्तस्वभावान्॥इतिगुरुदेवता
नामेदंभावयित्वाप्रार्थयेत्॥त्रैलोक्यचैतन्यमणित्रि
शक्तेहेविश्वमातर्भवदात्मतेजसा॥प्रातःसमुत्थायतव
प्रियार्थंसंसारयात्रामनुवर्तयिष्ये॥इतिसंप्रार्थ्यभूमि
प्रार्थयेत्॥समुद्रमेखलेदेविपर्वतस्तनमंडले॥वि
ष्णुपत्नीनमस्तुभ्यंपादस्पर्शक्षमस्वमे॥॥इतिसं
प्रार्थ्य॥॥स्वशास्त्रानुसारेणभूयोपादंदत्वाऽचे

॥बहिर्निर्गत्यदेहसोचंविधायहस्तोपादौप्रक्षाल्यच
म्य॥ॐकोंवामदेवायसर्वजनप्रियायनमः॥इतिदंत
काष्ठमादायः॥दंताल्लोध्य॥मूलेनमुखप्रक्षालने
कृत्वा॥देवतागुरुनामादिकीर्तयेत्॥स्नानार्थंगछे
तजलाशयंगत्वास्मानंविधिनास्नात्वाः॥अद्येत्यादि
श्रीवात्स्यत्रिपुराप्रीतयेस्नानार्थंहंकरिष्ये॥इतिसंक
ल्यःपश्चात्तजलेयंत्रंविचिंत्य॥ॐइतिअंकुसंमुद्र

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वा सूर्यमंडलानीत्यावर्त्य ॥ गंगेचयमुनेचैव ॥ गोदावरी
२ सरस्वति ॥ नर्मदासिंधुकावेरीजलेस्मिन्सन्निधंकुरु ॥
तत्रदेविस्मृत्वासलिलंतारुणंविभाव्य ॥ मूलेनत्रिम
ज्याचम्य ॥ मूलेनकुंभमुद्रयाशिरः ॥ संप्रोक्ष्यतस्यलक्ष
णंयथा ॥ दक्षांगुष्ठपरांगुष्ठंक्षिप्त्वाहस्तद्वयेनतुसाव
कारंगृहीत्वासिंचांमुद्रीकुर्यात्सांकुंभमुद्रिका ॥ तेनैव २
स्वदेहंत्रिधासंप्रोक्ष्य ॥ मूलेनशिराचम्य ॥ मूलेनश्रीका

तांत्रिपुरांतर्पयामि ॥ तिस्रिः संतर्प्यमूलेनधौतवास
सीपरिधायमूलेनतिलकंचाभिभूतिधारणंकृत्वा ॥ वैदि
किसंध्याविधायः तांत्रिकिसंध्यांकुर्यात् ॥ तद्यथामू
लेनाचम्यप्राणायामत्रयंकृत्वा ॥ ऋष्यादिन्यासंकरादि
हृदयादिषडंगंविधायध्यायेत् ॥ बालांबालार्कवर्णां एवं
ध्यात्वा ॥ मानसोपचारैःसंपूज्य ॥ वामहस्तेजलंगृहीत्वा
॥ दक्षहस्तेनसंपुटीकृत्य ॥ ह्रींयंरंलंवं ॥ इतिबीजैस्त्रिर

४ मंत्रमुच्चरित्वोदकेनदक्षहस्तेनतत्त्रयमूलेनसप्तधा
शिरश्शिखांप्रोक्ष्यअवाशिरोजलंदक्षहस्तेनादायनि धाय
वामनासिकयावमितिबिजेनांतःप्रविश्यदेहांतवृत्तिस
मस्तकत्रयंप्रक्षाल्यएवंविचिंत्यदक्षनासिकयाशिरो
चलजलंकृत्वाएंविभाव्यपुरतोवज्रसिलायांअस्त्रमं
त्रेणआस्फालयेत्दक्षहस्तोप्रक्षाल्याचम्यसूर्यायअर्घं ५
दद्यात्उत्थायउंमार्तंडभैरवायप्रकाशशक्तिसं

हितायसहस्रदीप्तयेस्वाहाः॥इतिविसर्गयजपेत्॥ऐंवा
गीश्वरीविद्महेक्लींकामेश्वरीधीमहितन्नःशक्तिप्र
चोदयात्॥इतियथाशक्तिजप्त्वागुरवेसादिनासर्प्पये
दिति॥एवंसंध्यत्रयंकुर्यात्तोपोविद्यासतंजपेत्॥अ
शक्तोदेवीध्यायन्॥यथाशक्तिमूलंजपेत्॥अथजल
देवीमूलेनध्यात्वामूलेनयथोक्तोपचारैःसंपूज्य॥स्वइ
ष्टविसर्जयेत्॥ततोहंसःइतिसूर्यदशःदिक्कनम

स्त्रोत्रस्तोत्रोदिकंपठेत्॥यागमंडपंगछेत्॥अथोदक
भांकुग्रहित्वायागमंडपमागत्यठेत्॥सूर्यसोमोयमः का
लोमहभूतानिपंचच॥एतेशुभाशुभस्येहकर्मणोन
वसाक्षिणः॥देविचेप्राकृतेचित्तेपापाक्रांतमभून्मम
॥तन्निसारयचित्तान्मेपापंफडितेनमः॥इतिम
त्रेणपापोत्सादनंकृत्वापादौपाणिप्रक्षालनाचम्य॥ॐ
वास्तोष्पतेमंडपायनमः॥इतिमंडपसंपूज्यसोः॥अ

स्त्रायफट्॥इतिद्वारंसंप्रोक्ष्यद्वारस्यदक्षिणे॥धंधात्रे
नमः॥वामेवंविधात्रेनमः॥दक्षेगंगंगायैनमः॥वामे
यंयमुनायैनमः॥ऊर्ध्वंद्वारश्रियैनमः॥ॐअधः
हेहस्मैनमः॥इतिसंपूज्य॥द्वारपालदेवदेवस्यद्वारेर
क्षतुयनतः॥निर्वघ्नंविघ्नसंघातमित्याज्ञापरमेश्व
रि॥इतिदेवताआवाह्य॥वामपादःपुरःसरमंतः
प्रविश्य॥नैऋत्यांवास्तुपुरुषायनमः॥इशानकोणे

दीपनाथायनमः॥तिक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम॥भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि॥इति
भैरवाज्ञांगृहीत्वा॥आसनंपूजयेत्॥ॐह्रींआधारशक्तिकमलासनायनमः इत्यासनंसंपूज्य॥पृथ्वित्वेति
आसनमंत्रमेरुपृष्ठऋषिः कूर्मोदेवतासुतलंछंदः
आसनेविनियोगः प्रथ्वित्वया॥इतिमंत्रेणोपविश्य
आस्त्रायफडितिताडत्रयंकृत्वा॥जलादिप्रोक्षणेन

नरंरंरंइतिमंत्रेणपश्चात्वामपादेनभूमानुविश्यानु
ल्लार्यसार्षपानविकरेच्च॥अपसर्पंतुयेभूतायेभूता
भूमिसंस्थिता॥येभूताविघ्नकर्त्तारस्तेनश्यंतुशिवा
ज्ञया:॥ॐचामेगुरुभ्योनमः दक्षेगंगणपतयेनमः
॥मध्येश्रीबालात्रिपुरायेनमः॥इतिन्यासंकृत्वा
र्यात्॥यथाआद्येत्यादिमंजपंतथापूजनयोग्य
तांप्राप्नुयेत्॥भूतशुद्धिप्राणप्रतिष्ठाअंजपांजपसंकल्प

पूर्वकं अंतर्मातृकाबहिर्मातृकातथाचवाग्भिपुराया:
न्यासानहंकरिष्ये॥इतिसंकल्प:॥भूतशुद्धिंकुर्यात्॥
मूलाधारतहंकारोगवाहंसःसोहंइतिमंत्रेणकुंभ
लनिमुद्रयाप्य॥सुषुम्णामार्गेणहृदयंनित्वा॥तत्रस्थ
दिपकलिकाकारं॥जीवमादायपरब्रह्मणिसहस्वक
मलेसंयोज्यशरीराकारगतंभूतगणंविशोधयेत्॥त
तःपादादिजानुपर्यंतंस्थितांप्रथिव्यांवादिनाभि

पर्यंतंस्थित्वा॥स्वकप्रविलाप्यनाभ्याहृदयांतंस्थि
तेवह्नौप्रविलाप्य॥तंचहृदयादिभ्रुमध्यांतंस्थितेवायो
तंचभ्रुमध्यादिब्रह्मरंध्रपर्यंतंतंचवायुमाकाशेप्रवि
लापयामिआकाशंअहंकारेप्रविलापयामि॥अहंका
रंमहंत्तत्वेप्रविलापयामि॥महत्तत्वंप्रकृतौप्रविलाप
यामिप्रकृतीपरब्रह्मणिप्रविलाप्य॥एवंप्रविलाप्य॥
अहंदेवोनचान्योऽ॥१॥इतिपठेत्॥दक्षकुक्षौपाप

पुरुषंविचिंतयेत्॥ ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुज
द्वयं॥सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं॥तत्सं
सर्गपदद्वंद्वंमहापातकं॥उपपातकरोमाणं
रक्तस्रुविलोचनं॥खड्गचर्मधरंपापंमनुष्यपरिमाण
कं॥अधोमुखंकृत्यवर्णंदक्षकुक्षौविचिन्तयेत्॥यं१६
पुरकरं६४कुंभकयं३२रेचक॥वं३२पुरकलं६४कुं
भक॥हं१६रेचकएवंप्राणायामंकृत्वा॥ततोपरमा

त्मनःप्रकृतिस्तत्त्वमहत्तत्वततोहंकारस्तन्मात्रादिका
र्यं॥तस्माद्वायुर्वायोस्तेजस्तेजसो॥जलंजलात्पृ
थिवीक्रमेणयथास्थानभूतानिसंरक्षाप्य॥ततोसो
हं॥इतिमंत्रेणात्मानंहृदयमानीयकुण्डलिनि॥यथा
स्थंप्रापयेत्॥स्वात्मानंचोत्तिष्ठंभावयेत्॥इतिभू
तशुद्धिः॥ततोप्राणप्रतिष्ठा॥हृदिहस्तंदत्त्वा॥ओं
आंह्रींक्रोंयंरंलंवंशंषंसंहंअंक्षंसंहंसः॥ह्रींक्षंहंसः

ममप्राणइहप्राणः ॥ॐआमिस्वाहाइहजीवइहस्थि
तः ॥ आमिस्वादिममसर्वेन्द्रियाणिवाङ्मनचक्षुश्रोत्र
जिह्वाप्राणप्राणइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहाः ॥
ॐहंसंहंसः क्रींॐइतित्रिःपठेत् ॥ दीर्घंतमावाणित्रिषु
पठ्यचत्वारिवाकपरिमितानितानिविदुर्ब्राह्मणायेम
निषिणः ॥ गुहात्रिणीनिहितानिगयंतितुरियंवाचोम ९
नुष्यावदंति ॥ ततोषोडशसंख्यार्थेषोडशप्राणवा

न् ॥ स्वहृदिजपेत् ॥ इतिप्राणप्रतिष्ठा ॥ ततोऽजपा
संकल्पंकुर्यात् ॥ अजपानामगायत्रियोगिनांमोक्षदा
यिनि ॥ तस्याःसंकल्पमात्रेणनरःपापैःप्रमुच्यते ॥
हकारेणबहिर्यातिसकारेणविशेत्पुनः ॥ हंसःसो
हमितिमंत्रेणजीवोजपतिसर्वदा ॥ षट्शतानिदिवा
रात्रौसहस्राण्येकविंशति ॥ ततोमूलाद्वारेचतुर्दल
पद्मेवंशंषंसंबीजसहितेचतुष्कलासहितेतत्रप्राण

जप्तषट्शतमजपागायत्रिजपकृतेनपूर्वेफर्जतेनश्रीम
हागणपतिप्रीयतांतस्योपरिलिंगस्थानेषट्दलपद्मेप्रा
णजप्तषट्सहस्रमजपागायत्रीजपकृतेनपूर्वेफजते
नश्रीब्रह्मादेवतांप्रीयतां॥ततोनाभौमणिपूरकचक्रेद
शदलेनीलवर्णेप्राणजप्तषट्सहस्रमजपागायत्रीज
पकृतेनपूर्वेफर्जतेनश्रीमहाविष्णुःप्रियतां॥ततोप
रिहृदिअनाहतस्थानेद्वादशदलपद्मेप्राणजप्तमज

पागायत्रिजपकृतेनपूर्वेफर्जतेनश्रीमाहारुद्रप्रीयतां
॥तस्योपरिकंठस्थानेविशुद्धिपद्मेषोडशदलसहितेषो
डशाक्षरासंहितेप्राणजप्तमजपागायत्रीजपकृतेन
पूर्वेफर्जतेनश्रीईशोदेवतांप्रीयतां॥तस्यापरिभ्रुमध्ये
अज्ञाचक्रेद्विदलपद्मेप्राणजप्तसहस्रमजपागायत्री
जपकृतेनपूर्वेयुजतेनश्रीगुरुप्रीयंतां॥तस्योपरिब्र
ह्मरंध्रेसहस्रदलपद्मेशुद्धस्फटिकसंनिभेनानाबीज

MEMORIAL

सहितेप्राणजप्तसहस्रमेकमजपागायत्रीजपकृतेन
११ पूर्वेणजप्तेनश्रीपरमगुरुप्रीयतां॥अजपानामगाय
त्रीत्रेतायेपुचर्षिरुक्ता॥अजपांचजपेन्नित्यंपुनर्ज
न्मोनविद्यते॥१॥ब्रह्मानंदंपरमसुखदंकेवलंज्ञान
मूर्त्तिं॥द्वंद्वातीतंत्रिगुणरहितंत्वमस्यादिलक्षं॥ए
कंनित्यंविमलमचलंसर्वदासाक्षिभूतं॥भावातीतं ११
गगनसदृसंसद्गुरुंतंनमामि॥२॥इतिजपाजप

विधिः॥ततोऽंतर्मात्रिकान्यासः॥षोडसस्वरैःपुरकं
कादिभिःपंचविंसतिचवर्णैः॥८॥कुंभकंयादिभिर्दश
वर्णैःरेचकं॥एवंप्राणायामंकृत्वा॥अस्यश्रीअंत
र्मातृकान्यासस्यब्रह्मऋषिः॥गायत्रीछंदःमात्रिका
सरस्वतीदेवता॥हलोंबीजं॥स्वराशक्तयः॥ममशरी
रशुध्यर्थेन्यासेविनियोगः॥अथऋष्यादिन्यासः॥
ब्रह्माऋषयेनमःशिरसि॥गायत्रीछंदसेनमःमु

वे॥ मातृकासरस्वतीदेवतानमः हृदि॥ ह्लीं बीजाय
नमो गुरवेस्वराः शक्तयेनमः पादयोः॥ मनशरीरशुद्ध
र्थे न्यासे विनियोगायनमः॥ सर्वांगे॥ ॐ अं कं ५ ॐ आं अं
गुल्फाभ्यांनमः॥ ॐ इं चं ५ ईं तर्जनीभ्यांनमः॥ ॐ उं टं ५
ॐ मध्यमाभ्यांनमः॥ ॐ एं तं ५ ऐं अनामिकाभ्यांनमः
॥ ॐ ओं पं ५ कनिष्ठकाभ्यांनमः॥ ॐ अं यं रं लं वं शं षं सं १२
हं क्षं हः अः करतलकरपृष्ठाभ्यांनमः॥ इतिकरं

न्यासः॥ अथ हृदयादिन्यासः॥ ॐ कं ५ ओं हृदयाय
नमः॥ ॐ ईं चं ५ ईं शिरसेस्वाहा॥ ॐ उं टं ५ ऊं शिखायै
वषट्॥ ॐ एं तं ५ ऐं कवचायहुं॥ ॐ ओं पं ५ औं नेत्रत्रया
यवौषट्॥ ॐ अं यं १० अः अस्त्रायफट्॥ अथध्यानं
आधारेलिंगनाभौप्रकटितहृदयेतालुमूलेललाटे॥
द्वेपत्रेषोडशारेद्विदसदशदले द्वादशाद्वैचतुष्के॥
वासांतेबालमध्येऽफकटसहिते कंठदेशेस्वराणां

हंक्षंतत्पदार्थयुक्तंसकलदलयुतंवर्णरूपंनमामि॥१॥
१२ अक्षस्रजंहरिणपोतमुद्यटंकंविद्यांकरैर्वीरतिंद
धतींत्रिनेत्रां॥अर्द्धेंदुमौलिमरुणांसरसिंदसंस्थां॥
वर्णेश्वरीप्रणमतस्तनमानमस्तां॥२॥एवंध्यात्वान्य
सेत्॥कंठेशोऽषोदलपद्मेअंनमः॥आंनमः॥इंनमः
ईंनमःउंनमःऊंनमःऋंनमः॥ॠंनमः॥ऌंनमःॡ १३
नमः॥एंनमःऐंनमः॥ओंनमःऔंनमःअंनमःअः

नमः॥ततोहृदयेहृदशदलपद्मे॥कंनमःखंनमः
गंनमः॥घंनमःङंनमःचंनमः॥छंनमःजंनमः
झंनमःञंनमः॥टंनमः॥ठंनमः॥ततोनाभौमणी
पूरकेदशदलपद्मे॥डंनमः॥ढंनमः॥णंनमः
॥तंनमः॥थंनमः॥दंनमः॥धंनमः॥नंनमः॥पं
नमःफंनमः॥ततोलिंगेषट्दलपद्मे॥बंनमः॥भं
नमः॥मंनमः॥यंनमः॥रंनमः॥लंनमः॥ततो

मूलाधारेचतुर्दलपद्मे॥वंनमः॥शंनमः षंनमः॥सं
१४ मः॥ततोभ्रुमध्येआज्ञाचक्रेद्विदलपद्मे॥हंक्षंनमः॥
ततोब्रह्मरंध्रेसहस्रदलपद्मे॥अंनमः॥आंनमः॥
इंनमः॥ईंनमः॥उंनमः॥ऊंनमः॥ऋंनमः॥ॠं
नमः॥ऌंनमः॥ॡंनमः॥एंनमः॥ऐंनमः॥ओंनमःऔं
नमः॥अंनमःअःनमः॥कंनमःखंनमः॥गंनमः १४
॥घंनमः॥ङंनमः॥चंनमः॥छंनमः॥जंनमः॥झं

नमः॥ञंनमः॥टंनमः॥ठंनमः॥डंनमः॥ढंनमः
णंनमः॥तंनमः॥थंनमः॥दंनमः॥धंनमः॥नंनमः
॥पंनमः॥फंनमः॥बंनमः॥भंनमः॥मंनमः॥यं
नमः॥रंनमः॥लंनमः॥वंनमः॥शंनमः॥षंनमः
संनमः॥हंनमः॥ळंनमः॥क्षंनमः॥इतिअंतर्मातृ
का॥ॐअस्यश्रीबहिर्मातृकामंत्रस्य॥ब्रह्माऋषिः॥
गायत्रीछंदः॥बहिर्मातृकासरस्वतिदेवता॥ह्सौं

विजानि॥स्वराःशक्तयः॥बिंदवःकिलकंममशरीरशु
ध्यर्थेन्यासेविनियोगः॥अथऋष्यादिन्यासः॥ब्रह्मा
ऋषयेनमःशिरसि॥गायत्रिछंदसेनमःमुखे॥वह्नि
मंडलकालरुद्रदेवतायैनमःहृदि॥हंसोविजाय
नमःगुह्ये॥स्वराःशक्तयेनमःपादयोः॥बिंदवःकि
लकेभ्योनमःसर्वांगे॥विनियोगायनमः॥करसंपु १५
टे॥ॐअंकं५आंअंगुष्ठाभ्यांनमः॥ॐइंचं५ईंतर्जनी

भ्यांनमः॥ॐउंटं५ऊंमध्यमाभ्यांनमः॥ॐऋंतं५ॠंअ
नामिकाभ्यांनमः॥ॐऌंपं५ॡंकनिष्ठकाभ्यांनमः
॥ॐअंयंरंलंवं१०अःकरतलकरपृष्ठाभ्यांनमः॥एवं
हृदयादि॥ॐअंकं५आंहृदयायनमः॥ॐइंचं५ईं
शिरसेस्वाहा॥ॐउंटं५ऊंशिखायैवषट्॥ॐऋंतं५ॠंक
वचायहुं॥ॐऌंपं५ॡंनेत्रत्रयायैवषट्॥ॐअंयं१०
अःअस्त्रायफट्॥अथध्यानं॥पंचाशत्त्रिपिभिर्भि

कमुखदोषासंधिवक्षस्थलांभास्यमौलिनिबद्धचंद्र
झाकलाप्रतिनतुंगस्तनी॥मुद्राप्रत्तगुणंसुसाधकस्य
श्रीविद्यांचहस्तांबुजेबिभ्राणांविशदप्रभांत्रिनयनांवा
देवतामाश्रये॥१॥एवंध्यात्वान्यसेत्॥ॐनमः॥केशां
ते॥ॐनमोललाटे॥ईंनमःदक्षनेत्रे॥ईंनमोवामने
त्रे॥उंनमोदक्षकर्णे॥ऊंनमोवामकर्णे॥ऋंनमोदक्ष
णनासि॥ॠंनमोवामनासि॥लृंनमोदक्षकपोले॥लृं

नमोवामकपोले॥एंनमःऊर्ध्वोष्ठे॥ऐंनमोअधरोष्ठे
॥ओंनमोऊर्ध्वदंतपंक्तौ॥औंनमोअधोदंतपंक्तौ॥अं
नमोजिह्वायां॥अःनमःकंठे॥कंनमोदक्षबाहुमूले
॥खंनमोदक्षकूर्परे॥गंनमोदक्षमणिबंधे॥घंनमो
दक्षांगुलिमूले॥ङंनमोदक्षहस्तांगुल्यग्रे॥चंनमो
वामबाहुमूले॥छंनमोवामहस्तांगुल्यग्रे॥टंनमोद
क्षपादमूले॥ठंनमोदक्षपादजानुनि॥डंनमोदक्ष

पादगुल्फे॥ढंनमोदक्षपादांगुलिमूले॥णंनमोदक्षपा
१७ दांगुल्यग्रे॥तंनमोवामपादमूले॥थंनमोवामपादां
गुलि॥दंनमोवामपादगुल्फे॥धंनमोवामपादांगुलि
मूले॥नंनमोवामपादांगुल्यग्रे॥पंनमोदक्षपार्श्वे॥फं
नमोवामपार्श्वे॥बंनमोपृष्ठे॥भंनमोनाभौ॥मंनमो
उदरे॥यंत्वगात्मनेनमोहृदि॥रंअसृगात्मनेनमोमु
खे॥लंमांसात्मनेनमोकुकुदिवंमेदात्मनेनमो

वामांत्रो॥शंअस्थात्मनेनमोहृदयादिदक्षहस्ताग्रा
तं॥षंमज्जात्मनेनमोहृदयादिवामहस्ताग्रातं॥सं
शुक्रात्मनेनमोहृदयादिदक्षपादाग्रातं॥हंप्राणात्म
नेनमोहृदयादिवामपादाग्रातं॥क्षंपरमात्मनेनमो
हृदयादिऊर्द्धांतं॥क्षःक्रोधात्मनेनमोहृदयादिमु
खांतः॥ॐअंआंइंईंइत्यादिक्षंक्षःपर्यंतअनेनव्या
पकंकुर्यात्॥इतिबहिर्मातृकान्यासः॥छः॥अथ

यं॰पु॰वि॰नवयोन्यात्मकं यंत्रं बहिरष्टदलान्वितं॥भू
१८ गृहंगुणैरलंचपूजनायलिखेत्सुधीः॥१॥ततःप्राण्
यामः॥मूलेनहृदयावारंपूरयेत्॥चतुर्षष्टिवारेणकु
भकेनस्वेभइत्वा॥षोडशवारंरेचयेत्॥एवंत्रिवारंकु
र्यात्॥अथनवयोन्यात्मकंन्यासः॥ह्रींश्रींऐंनमः
वामकर्णे२क्रींनमःदक्षणकर्णे२सौंनमःचुबुके२ १८
ऐंनमःवामस्कंधे२क्रींनमःदक्षणस्कंधे२सौंनमः

मुखे२ऐंनमःवामनेत्रे२क्रींनमःदक्षणनेत्रे२सौंनमः
नासाग्रे२ऐंनमःवामबाहुमूले२क्रींनमःदक्षणबा
हुमूले२सौंनमःउदरे२ऐंनमःवामकूर्परे२क्रींनमः
दक्षणकुर्परे२सौंनमःनीभौ२ऐंनमःवामपादे२क्रीं
नमःदक्षपादे२सौंनमःगुदे२ऐंनमःवामपार्श्वे२
क्रींनमःदक्षपार्श्वे२सौंनमःहृदी२ऐंनमःवामस्त
ने२क्रींनमःदक्षणस्तने२सौंनमःकंठे॥इतिनव

योन्यासकंन्यासः ॥अथयंत्रसाधनं॥अस्यश्रीयंत्र
१९ शोधनमंत्रस्य॥सदाशिवऋषिःत्रिष्टुप्छंदः॥पराश
क्तिर्देवताश्रींबीजं॥ह्रींशक्तिः॥क्लींकीलकं॥यंत्रशो
धनेविनियोगः॥ऋष्यादिकरहृदयन्यासंकृत्वा॥वि
ष्णुहृदिःमातृकान्यासंतथागं॥आद्यनारीश्वरन्यासः
॥मूलंत्रिखंडन्यासंकृत्वापीठपूजास्वहृदयेकुचयु १९
गलिंगहासनेस्थाप्यषट्चक्रंभेदनंस्यष्टदेवतंशोधये

येत्॥कुंडगोसामवेनवाआदृगंधेनवीदेवीघोरुषेणा
सेनवा॥अथमंत्रः॥ॐश्रींह्रींद्रींक्लींसौंइश्वरीनानायंत्रा
लयंशोधयशोधयठःठः॥इतियंत्रशोधनं॥अस्यश्री २०
संजीवमंत्रदक्षिणामूर्तिऋषिः अनुष्टुप्छंदः वाला
प्रस्तारीमंत्रस्यसंजीवनेविनियोगः॥सौंः क्लीं ऐं सौंः
संजीवनंकुरुकुरुस्वाहा॥ वालामंत्रेणन्यासध्यानं॥
इतिसंजीवने॥अस्यश्रीशापविमोचनंमंत्रस्यमूलप्र

कृतिरनुष्टुप् छंदः ॥ क्रीं बीजं शापविमोचने विनियोगः
२० मूलेन न्यासः ध्यानं ॥ ॐ क्रीं श्रीं ह्रीं अक्षर्यां क्रीं शाप
विमोचनं कुरु कुरु स्वाहा ॥ इति शापविमोचनं ॥ अथ
संपुटः सौः ॥ क्लीं ऐं सौः इति संपुटं ॥ अथ चक्रनिर्णयः
॥ बिंदुत्रिकोणरसकोणकनागपत्रवृत्तत्रयं चिंतयेत् ॥ म
सदनत्रयं च ॥ बालात्रिचक्रमिदमाहिमरंगशंब्र २०
सेंद्रविष्णुनमीतंगदितंमयाति ॥ १ ॥ अथ अंतर्यागविधिः

अंतर्यागविधिं कुर्यात् ॥ साक्षात् ब्रह्ममयो भवेत् ॥ मू
लाधारे मूलविद्यां विद्युत्कोटिसमप्रभां ॥ १ ॥ सूर्यकोटीप्र
तिकाशं चंद्रकोटीनिभं प्रिये ॥ विद्युत्तंतुस्वरूपां तां बिंदु
त्रयसमन्वितां प्रिये ॥ २ ॥ ऊर्ध्वशक्तिनिपातेन सहजेनवरा
ने ॥ मूलशक्तिः हटत्वेन मध्यबीजं प्रबोधतः ॥ ३ ॥ परमा
नंदसंदोहं सानंदचिंतयेत्परं ॥ इत्यंतर्यजनं कृत्वा
श्चात्पूजासमारभेत् ॥ ४ ॥ अथ ध्यानं ॥ मुक्तातपत्र

छायायांरक्तसिंहासनेस्थितां ॥अनर्घरत्नखचितमु
२१ कुटीरत्नकुंडलां ॥५॥ध्यायेद्देवीमहेशानांकुंदवदनम
ध्यगां ॥रत्नमंडपमध्येतुरत्नसत्कल्पवृक्षतरे ॥६॥पुस्त
कंचाभयंवामेदक्षिणेचक्षमालिकां ॥वरदानरतांदे
वींसम्यक्स्मरस्तुतिप्रदां ॥७॥एवंध्यात्वापूजाविघ्ननि
वारणार्थं ॥अथबटुकध्यानं ॥करकलितकपालं २१
कुंडलिदंडपाणि ॥रक्तारुणतिमिरनीलोव्यालयज्ञो

पवितंक्रतुसमयसपर्याविघ्नविछेदहेतुर्जयतिबटुक
नाथःसिद्धिदःसाधकानां ॥१॥एवंध्यात्वापूजांकुर्यात्
अथपात्रस्थापनविधिः॥दक्षिणतोदीपस्थाय॥अ
स्मिन्स्थानेदीपनाथविनिर्विघ्नंसाधकानांसिद्धिहेतवे
॥श्रीचक्रंपूजनार्थंमनुज्ञांदातुमर्हसि॥इतिदिपंसंपू
ज्य॥स्ववामेचतुरस्रंकृत्वानमः॥इतिसंपूज्य॥ऊंअं
॥मंडलायक्षौंक्लांमनेनमः॥श्रीबालात्रिपुरसु

दूर्यायनमः ॥ कलसाधारायनमः ॥ इत्याधारं संस्थाप्य
तदुपरि ॥ अथातोऽर्घविधिः ॥ ततः स्वधामभागे कल
शस्थापनं कुर्यात् ॥ आत्मनः पुरतो वामभागे चतुरस्रं
मंडलं कृत्वा ॥ तत्र यंत्रिकासंस्थाप्य ॥ यंत्रिकात्रिकोण
चतुस्रवर्तुलाकारं भवंति ॥ तस्मादेकात्मनेवकला
मंडलायनमः ॥ इतिसंपूज्य ॥ प्रणवेनजलपूरयेत् ॥ तं
त्रजलेओंसोंउंकात्मनेसोममंडलायनमः ॥ इति

संपूज्य ॥ इतिसामान्यार्घः ॥ ततः शंखस्यदक्षिणतः
त्रिकोणषट्कोणंचतुस्रंमंडलंविलिख्य ॥ पुष्पा
द्यक्षतेनसोमाद्यर्घतोयेनसंप्रेक्ष्य ॥ ऐंह्रींसौंइतित्रि
कोणंसंपूज्य ॥ द्विरावृत्यषट्कोणेषडंगादिसंपूज्य ॥
ऐंकामरूपिण्यायनमः ॥ ह्रींपूर्णगिरीपिठायनमः सौंजा
लंधरपिठायनमः ॥ ऐंह्रींसौंउड्डीयानपिठायनमः ॥ इ
तिमध्येसंपूज्य ॥ कामकलांसिरवीत्यायंत्रिकांसंस्थाप्य

॥तस्योमंदस कलात्मने वह्निमंडलायनमः॥रंरीरूंरैरौंहयग्रीवरुद्रांधर्मप्रदस्त्रीमंडलायदस कलात्मनेश्री
महात्रिपुरसुंदर्याः कलसाधारायनमः॥इत्याधारं
संपूज्य॥धूम्रावर्त्तेन कलापूजयेत्॥यंधूम्रार्चिकला
श्रीपा॰३रंउष्माकलाश्रीपा॰लंज्वालिनीकलाश्रीपा॰
पु॰॥ईंषंसुश्रीकलाश्रीपा॰पु॰॥ऊंसंसुरूपाकलाश्री
पा॰पु॰॥ऋंहंकपिलाश्रीपा॰पु॰॥ॠंह्रंहव्यवाहिनीश्री

पा॰पु॰॥ऌंक्षंकव्यवाहिकलाश्रीपा॰पु॰॥इतिकला॥
अथध्यानं॥अनघकलाध्यायेत्॥रक्तवर्णासुशोभना
॥रक्तांबरधारारक्तारक्तगंधानुलेपना॥१॥इतिदस क
लासंपूज्य॥तत्रसोवर्णाघन्यतमंमृन्मयंवाक्षालितं
अस्त्रेणधूपकलशंनिधाय॥ॐह्रींहूंवह्नाउच्चकषाय॥
स्वाहा॥इत्यनेनमंत्रेणदशांशेधूपंदेत्वा॥तस्मिन्पा
त्रेऐंसंदिपिनीज्वालामालिनिहुंफट्॥ह्रींयोनिमुद्रांवि

नस्त्रप्रणवेनाभिमंत्र्यअवगुंठनमुद्रयाअवगुंठ्य॥ॐह्रीं
नमःक्षंनमःहंनमःश्रीनमः॥इतिबीजपंचकं॥तस्मि
न्पात्रेविन्यस्य॥ॐह्रांश्रींस्फीं॥ॐनमोभगवतीमहा
त्रिपुरसुंदरीपरधाम्नीऊर्ध्वशून्यमधोशून्यप्रकाशपरका
शभासुरिसोमसूर्याग्निभक्षणीआगच्छ२विश्वविश्व
पात्रंग्राहयग्राहयप्रस्फुर२फोंवौषट्॥इतिपात्रवि
न्यासःआचार्य॥श्रीमन्महात्रिपुरसुंदरीकुलसंस्था

पयामिनमः॥तस्मिन्पात्रेसंस्थाप्य॥अद्वादशकलात्म
नेअर्कमंडलायनमः॥हांहींहुंहैंहौंहः हृदयवरयूंहृं च
तुंप्रदसूर्यमंडलायनमः॥द्वादशकलात्मनेवाग्भवात्रिपुर
सुंदर्यैनमः॥कंभंतपनिकलाश्री॰ॐखंवंतापिनीश्री॰
गंफंधूम्रार्चिकलाश्री॰॥ॐघंपंयमरुचिश्री॰॥ॐङंनं
ज्वालिनिश्री॰॥ॐचंधंश्री॰ॐछंदंसुषुम्नाकलाश्री॰जंपं
भोगदाकलाश्री॰झंतंविश्वकलाश्री॰ॐञंत्रंबोधिनिश्री॰

ॐ ठं ॐ धारिणी कलाश्री० ठं ठं क्षमा कलाश्री० ॥ इति संपू
२५ ज्य ॥ ततो जलेन सं सीं सुं सौं सः सकामप्रदेषोडशकला
त्मनेसोममंडलायनमः ॥ श्रीं महाबलात्रिपुरसुंदर्याः
कलशामृतायनमः ॥ इति जलेन संपूज्य ॥ अष्टौभैरव
अष्टमातरात्तत्र पूजयेत् ॥ इति संपूज्य ॥ षडंगानि पंच
रत्नानि संपूज्य ॥ सोमस्यषोडस्य कलापूजयेत् ॥ २ ॥ अं २५
अमृतकलायेश्री० अमानंदाकलायेश्री० इदंपुषाकला

श्री० ॥ इदंतुष्टीकलाश्री० ॥ ॐ पुष्टीकलाश्री० ॥ ॐ हं शृति
कलाश्री० ॥ ॐ धृतिकलाश्री० २ ॐ क्षं शशिनीकलाश्री०
॥ ॐ लं चंद्रिकाकलाश्री० ॥ ॐ कांतिकलाश्री० ॥ ॐ ज्यो०
॥ ॐ ऐं श्रीकला० ३ ॐ प्रीतिकला० ॐ अंगदकला० अं पूर्ण
० अः पूर्णामृतायै० ॥ मूलेनविरिक्षअस्त्रेणप्रोक्षतेन
वकुशेनैवसंताड्य ॥ कवचेनाभुक्तकामराजेनाऽएक
त्मपरामृतपदंनावहेनाआतीन्त्रियंजपंसुंदरीकल

समृतीकरोतिइतिसप्तवारमावर्त्यमृतीकृत्यमंत्रिरुध्या
२५ वगुंठ्यअस्त्रेणसंरक्ष्यधेनुमुद्रांयोनिमुद्रांप्रदर्श्य॥इति
कलसस्थापनविधिः॥अथद्रव्यशोधनविधिः॥ॐनमः
इंकुंभेपुष्पंदत्वामंत्रेत्रिकोणंविलिख्य॥ह्रौंह्रौंत्रिरिषा
॥ॐवामदेवायवौषट्इतित्रिरिषू॥ॐह्रूंः पशुपतये॥
ॐअस्त्रायफट्॥ॐह्रौंश्रींपरमस्वामिनिपरमाकाशशू २५
न्यवासिनिचंद्रसूर्याग्निभक्षणिपात्रंविशाश्वाः॥इतित्रिः

सकृद्वारंसंपूज्य॥ॐऐंह्रींश्रींआनंदेश्वरायविघ्नहेसुधा
देव्यैचधीमहीतन्नोधीनाःश्वरप्रचोदयात्॥इत्यानंद
गायत्रीजपेत्॥त्रिजप्त्वा॥ॐहंसःशुचिषद्वसुरंतरि
क्षंसद्होतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदसत्
रुद्रयेमसद्क्षागोजाऋतजाअद्रिजाऋतंबृहत्॥इ
तिद्रव्योपरित्रिवारंपठित्वा॥ॐवांब्रह्मशापाद्विमुक्ता
येसुधादेव्यैनमः॥इतिदशधाजपेत्॥ॐह्रींश्रींक्रों

दसुधादेव्यैनमः कुरुशापमोचयर्२अमृतंश्रावयर२स्वा
हाः॥ॐसूर्यमंडलंसंभूतेवरुणालयसंभवे॥आमावी
जमेयेदेवीशुक्रस्यविमोचनी॥देवानांप्राणोबीजंब्र
ह्मानंदमयोयदितेनसत्येनदेवेशिशुक्रशापप्रमुच्यतां
॥इतिप्रत्येकत्रिभिरभिमंत्र्य॥एकमेवपरब्रह्मस्थूलसू
क्ष्ममयंध्रुवं॥कचोद्भवंब्रह्महत्यांतेनतेनाशयाम्यहं २७
॥मूलेनापृथाप्रतिकामकलायांदेवीमावाह्य॥सक

लीकृत्यदिग्बंधनंकुर्यात्॥ह्रींनेत्रत्रयायवौषट्॥इति
दिव्यदृष्टासंविक्षप्रसादमुद्रांयोनिमुद्रांप्रदर्श्य॥इतिद्र
व्यशुद्धिः॥अथद्वितीयाशोधनं॥मीनमुद्रादीनांसो
धनमाह॥ॐयंइतिसंशोष्य॥अंरंइतिसंदह्य॥ॐवमि
तीअमृतेनप्लाव्यतत्स्योपरिधेनुमुद्रांप्रदर्श्य॥ॐहूंइ
त्येवमुच्चकजितिसंप्रोक्ष्यतेषामुपरिमूलंदशधाप्रज
प्यआनेनक्रमेणसोधयेदिति॥ॐप्रतिविलंस्तवते

वीयेण भृगोन भीमः कुचयोगीरिष्टाः ॥ यस्योरिपुत्रिषु
द्विक्रमेण षधिक्षियंतिभूयानारिष्टा इतिशुद्धिः
॥ अथमान० ॥ ॐ यमितिशंषोष्य ॥ ॐ रमितिसंदग्ध्य ॥ ॐ
वमितिधेनुमुद्रयाअमृतीकृत्य ॥ ॐ हूं इत्यवगुण्ठ्य ॥ ॐ
फडितिसंप्रोक्ष्य ॥ तस्योपरिमूलदंसंधाप्रजप्य ॥ त्र्यंब
कंयजामहेसुगंधिंपुष्टिवर्द्धनं ॥ उर्वारुकमिवबंधना
न्मृत्योर्मुक्षीयमामृतात् ॥ इतिमिनशुद्धिः ॥ अथमुद्रा

शोधनं ॥ ॐ यमितिसंशोष्यॐ रमितिसंदग्ध्य ॥ ॐ वमितिं
अमृतेनप्लाव्य ॥ वमितिधेनुमुद्रयाअमृतीकृत्य ॥ ॐ
हूं इत्यवगुण्ठ्य ॥ फडितिसंप्रोक्ष्य ॥ तस्योपरिमूलंदंसंधा
प्रजप्य ॥ त्र्यंबकमितिमंत्रेणमीनशुद्धिः अनेनक्रमेण
मुद्राशोधयेत् ॥ तद्विष्णोः परमंपदंसदापश्यंतिसूरयः
दिवीचचक्षुराततंतद्विप्रासोविपन्यवोजागृवांसः ॥
सःसमीधतेविष्णोर्यत्परमंपदं ॥ इतिमुद्राशोधन ॥

MEMORIAL

अथ ललना शोधन कानि पृक ॐ ह्रीं श्रीं वाग्वादिनि पुरायै न
२९ मः ॥ इमां शक्तिं पवित्रीकुरु मम शक्तिं कुरु २ स्वाहा ॥
॥ इति सामान्य मज्जलेन संप्रोक्ष्य ॥ ततः शनैः शनैः
स्तत्कुरोस्त्वा भेदेन निजमंत्रं जपेत् ॥ ॐ हूं हूं ऊर्ध्व फ
ट् स्वाहा ॥ ॐ ह्रीं श्रीं सुरतप्रीये ॐ ह्रीं श्रीं हूं फ ट् स्वाहा
॥ ॐ अमृते अमृतोद्भवे अमृतवर्षिणि देवी शुक्र शो २९
षमोक्षय २ अमृतं स्रावय २ अमृतं कुरु २ स्वाहा ॥ ॐ वि

ष्णु योनीकृत्य यंतु त्वष्टरूपाणी प्रवीत्रात असिंचतु
प्रजापतिर्धातागर्भं दधातु ॥ तेगर्भं देहि सिनिवालि
गर्भधेहि सरस्वति ॥ १ ॥ गर्भंतेअश्विनेदेवाः गधक्रां
पुष्करजस्रजां ॥ रुपमेचतु गोविंदं वृद्धावनोत्तरासा
ह ॥ इतिलक्षाशुद्धिः ॥ अथपूर्वदेवमंडलंकृत्वातथै
वसंपूज्य ॥ तत्रअग्निपदिक्कासंस्थाप्य ॥ तस्यापूर्वंवतव
ह्नीमंडलंसंपूज्य ॥ तत्रवर्णादिन्यतमं ॥ नाभिकेतोद्र

वंमहाशंखंकुर्मकपात्रश्रीसोंइवंमुक्काशुक्लोंइवंवाश्री
पात्रंसंस्थाप्य॥तत्रसूर्यमंडलंपूज्य॥मूलविद्ययासं
पूजयेत्ततनकलसमध्येभागत्रयावशेषस्थित्रिभागं
जलंपात्रांतरेणोधृत्यमूलेनपात्रंसपूरयेत्॥तत्रगं
धाष्टकंविलिप्य॥पूर्ववत्सोममंडलंसंपूज्य॥ग्लूंग
गनरत्नायनमः॥ॐ३क्लूंपातालरत्नायनमः३ॐरं ३०
रगरत्नायनमः३॥ॐमंरत्नायनमः॥इतिपंचरत्ने

॥इतिमध्येचतुरिक्षचक्रकथाद्विरेफाद्यैहस्तान्तरंत्रि
कोणंविचिंत्यमूलविद्ययासंपूज्यहृदावृत्याषडंगानि
चसंपूज्यमस्मुद्रयासंस्थाप्य॥ॐऐंह्रींश्रींक्लूंभ्रोंजुंसः
प्रभृतेअमृतोद्भवेअमृतंवर्षिणिअमृतंश्रावयं२स्वाहा
॥इतित्रिवारंमन्त्रिमंत्र॥एवारुणीजलेनमूर्त्तयेयामे
त्यैपृथिदेवतायैनमः॥इमंवसीगृहंसर्वदोषानो
चाटयट्ठंफट्स्वाहा॥यासुधासाऽमादेवीयोमद्दसम

हेश्वरः॥योगंधर्शंभवेब्रह्मायोमोहसजनार्दनः॥स्वा
२१ देतुसंस्थितंसोमोफेनआनीलउच्यते॥इछायांमन्म-
थोदेवोनाभायांबटुकभैरवः॥ऐंरुंधादेवींविघ्नहेकीं
अमृतेश्वरीधीमहिसोतन्नतुष्टिप्रचोदयात्॥इतिअ
भिमंत्र्य॥अखंडैकरसानंदकरेपरसुधात्मिके॥स्वं॥
छदःस्फुरणशक्तिविधेयकुलरूपिणी॥इतिचतुर्वा २१
रमभिमंत्र्य॥हसक्षमलवरयूंआनंदभैरवायवौषट्

ट्॥सहक्षमलवरयूंआनंदभैरव्यैवौषट्॥इतिमध्येसं
पूज्य॥सहक्षमलवरयूं॥रुंधादेव्यैवौषट्॥इतिमंत्र
त्र्य॥तदुपेणैकस्पर्शनिःसत्यैतवरूपीणीभूत्वापरामृ
ताकारमयिविस्फुरणंकुरु॥३॥इतिपंचवारमभिमंत्र्य॥अकुलस्थामृताकारेसिद्धज्ञानकेरपरे॥अमृतें
शनिधेयस्मिन्वस्तुनिस्फुरन्नरूपिणी॥ऊंऐंक्रींइति
पंचवारंमभिमंत्र्य॥ऊंह्रींहंसःसोहंस्वाहा॥इतिपरं

ज्योतिःपरंज्योतिषे॥ॐमितिपरकमलयाहसंइत्यज-
३२ पयासपूर्णमानकयासक्रुदभिमंत्र्यसकृत्स्नाज्ञानित्वा
भिः॥मूलेनसप्तवारमभिमंत्र्य॥कौमकलयावास्त्र
यमभिमंत्र्य॥पुष्पाद्यैरभिपूज्यदिव्यामृतंभावयेत्॥
इतिविशेषार्घ्यविधिः॥ततःसंपत्रिपदिकापूजाविधाय॥एकंतुसामान्यार्घ्यपात्रं॥१॥ततपरंभैरवपा ३२
त्रं॥२॥ततःपरंभोगपात्रं३॥ततःपरंयोगिनिपात्रं

४॥ततःपरंगुरुपात्रं५॥ततःपरंसायिकपात्रं६॥त
तःपरंआत्मपात्रं७॥ततःपरंशक्तिपात्रं८॥एवंमनु
क्रमेणपात्राणिसंस्थाप्यविशेषतः॥संपूज्यपुष्पादौ
घृतेनविशेषार्घ्यबिंदुविक्षिप्यततस्तेनात्मानंपूजासा
धनंचप्रोक्षयेत्॥ततःस्वगुरुंनाथंयावत्तरमनाथादि
पादुकासामान्यपात्रंद्रव्येणसंपूज्य॥संतर्प्यस्वगुरुंचत्रि
स्तर्पयेत्॥ततःसमस्तभगवद्गुह्येतिसमष्टिमंत्रेणपु

प्यांजलिंदत्वा॥आत्मानंदेवताभिन्नंदेविभावयंधा
२२ दिभिरलंकृत्यमूलेनसिरसिवारत्रयंपूज्यसंतर्प्यनि
त्यामंत्रैर्नित्यास्तर्पयेत्॥अत्रैवतावत्कर्तुमसमर्थस
दासामान्यपात्रादिभोगपात्रांतंपात्रचतुष्टयंस्थापये
त्॥तावत्कर्तुमसमर्थःसदासामान्यपात्रांतमासाद
येत्॥अत्रविशेषः॥इतिहिवचनंतदर्द्धस्तुतुरुमवाद २३
वगंतव्यः॥विशेषाभावेघृतेनवामधुनावापयावागो

तक्रेणवाद्रवेणशुद्धयापूरयेत्॥इतिअर्घ्यस्थापनादि
पात्रस्थापनविधिः॥अथश्रीचक्रस्याधः॥सिंहास
नध्यात्वातदधः॥स्वरूपार्युपरिपूजयेत्॥ॐमंमंडूका
यनमः॥ॐमूलप्रकृत्यैनमः॥ॐआधारशक्तयेनमः
॥ॐकूर्मायनमः॥ॐअनंतायेनमः॥ॐवाराहायन
मः॥ॐपृथिव्यैनमः॥ॐतप्तकांचनवर्णायनमः॥ॐर
त्नद्वीपायनमः॥ॐस्वर्णपर्वतायनमः॥ॐनंदनपुर्युप

रिनंदमोघायनमः॥ॐकल्मषादपेभ्योनमः॥ॐरत्ना
भूमिकायैनमः॥ॐश्रीरत्नमंदिरायैनमः॥ॐरत्नवे
दिकायैनमः॥ॐरत्नछत्रायैनमः॥ॐरत्नसिंहासना
यैनमः॥दक्षिणेततोआग्न्यादिविदिग्गेषुधर्मायनमः
ज्ञानायैनमः॥वैराग्यायनमः॥ऐश्वर्यायनमः॥मध्ये
अधर्मायनमः॥आज्ञानायनमः॥अवैराग्यायनमः
अनैश्वर्यैनमः॥ततोमध्येकंदायनमः॥ज्ञानात्मा

MEMORIAL

नायनमः॥पद्मायनमः॥पत्रेभ्योनमः॥केसरेभ्यो
नमः॥ऊर्ध्वकर्णिकायनमः॥अग्निमंडलायनमः॥
सोममंडलायनमः॥सत्त्वायनमः॥रजसेभ्योनमः
॥तमसेभ्योनमः॥आत्मनेनमः॥परमात्मनेनमः
ज्ञानात्मनेनमः॥मायातत्त्वात्मनेनमः॥कालतत्त्वा
त्मनेनमः॥विद्यातत्त्वात्मनेनमः॥अग्रेयादिब्रह्मणे
पृथिव्याधिपतयेनमः॥विष्णवेअपामधिपतयेन

मः॥रुद्रायतेजोधिपतयेनमः॥ईश्वरायवाचाधिपत
येनमः॥सुधार्णवासनायनमः॥चक्रासनायनमः
॥साध्यसिद्धासनायनमः॥तत्पीठेपूर्वादिश्रीपूर्वेइ
छायेनमः॥ज्ञानायेनमः॥क्रियायेनमः॥कामन्येन
मः॥कामदायिन्येनमः॥रत्येनमः॥रतीप्रियायनमः
॥नंदायैनमः॥मनोन्मन्येनमः॥मध्येहंसोसदासी
वमहाप्रेतपद्मासनायन०॥इणासनंसंपूज्यमूलेन

श्रीबालात्रिपुराचक्रे॥पीठंदेवताभ्योनमः॥इतिपुष्पां
जलिपुनःकराभ्यांपुष्पांजलिगृहित्वामूलाधारातकुंड
लीनीहृदयेअनाहतेरक्तपंकजेसमानीयवह्न्यासा
पुटेनआवाहयेत्॥महापद्मवनांतस्थेकरुणानंदवि
ग्रहे॥सर्वभूतेहितेमातरेह्येहिपरमेश्वरी॥मूलेनश्री
महात्रिमहाविद्येसकलपरिवारसहितेअस्मिन्मंडले
आगछ२स्थानिध्यंकुरु२स्वाहा॥देवेसिभक्तिसुलभे

परिवारसमन्विते॥यावत्त्वांपूजयिष्यामितावद्देविइहावह
३५ इतिपुष्पांजलिंक्षिपेत्॥अथध्यानं॥रक्तांबराचंद्रकला
वतंससमुद्यद्दित्यनिभांत्रिनेत्रां॥विद्यास्रमाक्षाभय
दानहस्तोध्यायामिबालामरुणांभुजस्तां॥१॥कपूरिता
टंकमुरवारविंदामाणिक्यमंजीरपदारविंदां॥युवामि
राघूर्णितलोचनानां॥बालांभजेहृत्तमालमालां॥२॥३५
॥इतिध्यात्वा॥ततःआवाहनादिमुद्राप्रदर्शयेत्॥आ

वाहनंसंस्थापनं॥संनिधायनं॥संनिरोधनं॥अव
गुंठनं॥सन्मुखीकरणंसकलीकरणं॥परमीकर
णं॥अमृतीकरणं१०॥ततोविशेषमुद्रा॥वरदाअ
भयदापुस्तकं॥अक्षमालाअंकुशा॥पास॥चाप॥
बाण॥कपालकमल१०॥ततोषोडशोपचारंकृत्वा
॥मूलेनश्रीबालात्रिपुरायैएषाद्यंनमः॥पादयोः
मूलेश्रीपा॰एतदाचमनीयंनमः॥मुखेमूलंश्रीपा॰

॥इदमर्घ्यंस्वाहाः सीरसीमूलंश्रीपा० एकतेमकपर्के
३७ स्वधामुखेमूलंश्रीपा०॥इदंस्नानीयंनमः॥सर्वांगेच
स्नंगृहाणेतिवस्त्रंदत्वा॥अभूषणं॥छत्रचामरंस
कल्पराजोपचारान्कृत्वा॥मूलंश्रीबालात्रिपुरसुंदर्यं
श्री०॥इमंमंत्रत्रिवारंसंपूज्य॥मूलेनधूपदीपनैवेद्यो
आरार्तिकंकृत्वाप्रणम्ययोनिमुद्रांप्रदर्श्य॥प्रार्थनाकृ ३७
त्वा॥सच्चिन्मयेपरेदेवीपरामृतरसप्रिये॥अनुज्ञांत्रि

पुरेदेहिपरिवारार्चनार्चने॥इत्याज्ञांलब्ध्वाआवरणो
देवतांपूजयेत्॥आदौत्रिकोणेगुरुपूजाश्रीदक्षभा
गे॥ॐपरप्रकाशानंदनाथश्रीपादुकांपूजयामितर्पया
मिनमः॥परमेशानंदनाथश्रीपा०॥ॐसर्वज्ञसिद्धा
नंदनाथश्रीपा०॥ॐअमृतानंदनाथश्रीपा०॥इति
सप्तदिव्यौघःसंपूज्य॥तत्रत्रिकोणस्यैशानेश्रीगु
पादुकां०॥तत्परंपराश्री०अघोरायश्रीपा०॥ॐवाम

देवायश्रीपा०॥ॐसद्योजातायश्री॥इतिपंचसिद्धौपा॥
२८ तत्त्रिकोणेश्रीवामभागेॐश्रीगुरुभ्योनमश्रीपा०॥श्री
परमगुरुभ्योनमःश्रीपा०॥ॐपरमेष्ठिगुरुभ्योनमःश्री
०॥ॐपरात्परगुरुभ्योनमःश्री०॥ॐपरात्परतरगुरु
भ्योनमःश्री०॥इतिमानवौघाः॥अथषडंगपूजा॥
श्रीअग्नये॥ॐऐंहृदयांगदेवतायैश्री०॥श्रीईशाने २८
क्लींशिरसांगदेवतायैश्री०॥श्रीनिरृतेसौंःशिखांगदेव

तायैश्री०॥श्रीवायवेऐंकवचांगदेवतायैश्री०४॥श्रीम
ध्येक्लींनेत्रत्रयांगदेवतायैश्रीपा०५॥चतुर्दिक्षुसौंःअ
स्त्रांगदेवतायैःश्रीपा०६॥अथआवरणपूजा॥ॐह्रीं
श्रीत्रिकोणेपद्मासनायनमःश्री०॥त्रिकोणेह्रींश्रींरति
देवीश्रीपा०॥ॐउत्तरकोणेश्रीप्रीतिदेवीश्रीपा०॥श्रीद
क्षिणकोणेह्रींश्रींमनोभवादेवीश्रीपा०॥ॐउत्तरकोणे
द्रांक्षोभणबाणदेवीश्रीपा०॥ॐद्रींद्रावणबाणदेवि

श्री०॥ श्रीदक्षिणकोणेक्रींआकर्षणबाणदेविश्रीपा०
भ्रूवस्त्रबाणदेवीश्री०॥ कोणग्रेसःउन्मादबाणदेवी
श्री०॥ इतिबाणः॥ दक्षिणकोणेक्रींकारप्रदेवश्रीपा०॥
क्रींमन्मथदेवःश्रीपा० श्रीवामकोणेऐंकदर्पदेवश्रीपा०
क्लींमकरध्वजदेवश्रीपा०॥ कोणाग्निश्रीमीनकेतनदेव
श्रीपा०॥ इतित्रिकोणपद्मसायुधाः॥ सावहनासपरिवा
राःसांगपूजितास्तर्पितासंतुमांरक्षंतुनमःपुष्पांज

लिंदद्यात्॥ इतिप्रथमावरणं॥ अष्टकोणपद्मायनमः॥
श्रीपूर्वादिःप्रदक्षिणेनमः॥ क्रींसुभगायैश्रीपा०॥ क्रीं
भगायैश्रीपा०॥ क्रींभगसर्पिण्यैश्रीपा०॥ क्रींभगमा
लिन्यैश्रीपा०॥ क्रींअनंगानंगरंगायैश्री०॥ क्रींअनंगकु
सुमायैश्रीपा०॥ क्रींअनंगमेखलायैश्रीपा०॥ क्रींअनं
गमदनायैश्रीपादु०॥ इत्यष्टकोणपद्मेसायुधासवाह
नासपरिवाराःसांगपूजितास्तर्पिताःसंतुमांरक्षंतुस्वा

हृन्मूलेन पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणं ॥ अष्ट
४० दल-पद्मासनायनमः ॥ श्रीपूर्वोदितः आं ब्रह्मणेनमः ॥
श्रीपा० ॥ ईं माहेश्वर्यैनमः श्रीपा० पु० न० ॥ उं कौमार्यैन
मः श्रीपा० ॥ ऊं वैष्णव्यैनमः श्रीपा० लं वाराह्यै० श्रीपा०
॥ ऐं ब्राह्मणेनमः श्रीपा० ऊं चामुंडायै श्रीपा० ॥ अः महा
लक्ष्म्यैनमः श्रीपा० ॥ इत्यष्टदलपद्मे सायुधा सवाहना
सपरिवारा सांगा पूजिता तर्पिता संतु मां रक्षंतु स्वाहे ४०

हृन्मूलेन पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणं दलेअष्टौ
भैरवायनमः ॥ असितांग भैरवायनमः श्रीपा० ॥ रुरु भै
रवायश्रीपा० चंड भैरवायश्रीपा० क्रोध भैरवायश्रीपा०
॥ उन्मत्त भैरवायश्रीपा० ॥ कपाल भैरवायश्रीपा० भीष
ण भैरवायश्रीपा० ॥ संहार भैरवायश्री० ॥ इति दलेसायु
धा सवाहना सपरिवारा सांगा पूजिता तर्पिता संतु मां
रक्षंतु स्वाहेति पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणं ॥ ४

अष्टग्रंथिपद्मे॥श्रीपूर्वादिप्रादक्षिणेदलाग्रे॥कामरूपीठा
यश्रीपा०॥महालयंश्रीपा०॥कलिंगपिठायश्रीपा०का
लांतकपीठायश्रीपा०॥चौहारपिठायश्री०॥जालंधरपी
ठायश्री०॥उडियानपिठायश्री०॥देवकोटपिठायश्रीपा०
॥इतिग्रंथिस्थानेपाश्चिमादिक्रमात्संपूज्य॥सायुधा
सवाहनासांगासपरिवारापुजितास्तर्पितासंतुमांर
क्षंतु॥इतिपंचमावर्ण॥५॥शूलाष्टकपद्मेततःप

श्चिमादिहेतुकभैरवायश्रीपा०त्रैलोक्यभैरवायश्रीपा०
त्रिपुरांतकभैरवायश्रीपा०॥अग्निजिह्वभैरवायश्री०
कालांतकभैरवायश्री०॥कपालिनिभैरवायश्री०
॥एकपादभैरवायश्री०॥भीमरूपभैरवायश्री०
॥अधःरुरुभैरवायश्री०॥ऊर्ध्वहाटकेश्वरभै
रवायश्री०॥इत्यष्टशूलपद्मेसायुधासवाहनाः॥
सांगसपरिवारासुपूजिताःस्तर्पितासंतुमांर

स्तुनमःस्वाहेतिपुष्पांजलिंदत्वा॥इतिपरमाव
५२ रणं॥६॥चतुरस्रेसश्वदिक्षपूर्वादिपूर्वेइंद्रायसुराधि
पतयेवज्रहस्तायैरावतवाहनायसशक्तिकाय
श्री०॥अग्नयेअग्नेतेजोधिपतयेशक्तिहस्ता
यमेषवाहनायसशक्तिकायश्रीपा०॥दक्षि
णेयंयमायप्रेताधिपतयेदंडहस्तायमहिषवाह ५२
नायसशक्तिकायश्री०॥नैऋतेक्षनैऋत्येर

क्षाधिपतयेखड्गहस्तायनरवाहनायसशक्तिकायश्री
पा०॥पश्चिमेवंवरुणायजलाधिपतयेपाशहस्ताय
मकरवाहनायसशक्तिकायश्रीपा०॥वायव्येयंवाय
वेप्राणाधिपतयेअंकुशहस्तायमृगवाहनायसशक्ति
कायश्री०॥उत्तरेकंकुवेरायधनाधिपतेगदाहस्ताय
अश्ववाहनायसशक्तिकायश्री०॥ईशानेयंभूताधिपत
येशूलहस्तायवृषभवाहनायसशक्तिकायश्री०॥

॥ऊर्ध्वेॐब्रह्मणेलोकाधिपतयेपद्महस्तायहंसवाहना
४२ यसशक्तिकायश्रीपा० ॥अधःक्रींवीरभद्रेपृथिव्याधि
पतयेचक्रहस्तायगरुडवाहनायसशक्तिकायश्री० पूः
जस्तत्ताःसंतुमांरक्षंतुनमःस्वाहेतिपुष्पांजलिंदत्वाइ
तिसप्तमावरणं ॥७॥श्रीपूर्वेबटुकायनमःश्रीपा० ॥द
क्षिणेयांयोगिनिभ्योश्रीपा० ॥पश्चिमेक्षेत्रपालायु ४३
श्रीपा० ॥उत्तरेगंगणपतिभ्योनमःश्रीपा० ॥वायव्येवं

वसुभ्योनमःश्रीपा० ॥ईशानेमंहादशरुद्रेभ्योनमःश्री
पा० ॥अग्नयेहौंएकादशरुद्रेभ्योश्री० नैऋत्येसर्वेभ्योभू
तेभ्यश्चश्रीपा० ॥इतिचक्रेसंपूज्य ॥इतिआवरणपूजा
समाप्तः ॥ घंटांसंपूज्य ॥भंवायतोधूपसमर्प्पयन
स्वेतिमंत्रेणमूलेनसंगायेसपरिवारायेसायुधायेस
वाहनेभगवत्यैश्रीबालात्रिपुरासुंदरीधूपंनिवेदया
मितोदीपं ॥सुप्रकाशोमहादीपसर्वत्रतिमिरापहं

स्वाद्याभ्यंतरंज्योतिर्दिपोयंप्रतिगृह्यतां॥मूलंतिसं
गा०॥दिपंनीवेदयामीतितोनैवेद्यंकडितिमंत्रेणाजलि
संप्रोक्ष्य॥चक्रमुद्रांप्रदर्श्य॥हेमपात्रंगतंदिव्यंपरमान्नं
दसंस्कृतं॥पंचधाषडृसोपेतंगृहाणत्रिपुरेश्वरि॥१
मूलांतेसांगायेनैवेद्यंसर्वदेवदेवेशीसर्वतृप्तीकरंपरं
अखंडानंदपूर्णेगृहाणजलमुत्तमं॥ततोतांबूलंपा
त्रात्रसंभूतंकर्पूरादिसुवासितं॥मयानिवेदितं

देवीतांबूलंप्रतिगृह्यतां॥मूलांतसांगायैतांबूलं॥त
तोनित्यहोमः॥मूलेनपंचप्राणाहुतिंदद्यात्॥ॐप्राणा
यस्वाहा॥अपानायस्वाहा॥ॐव्यानायस्वाहा॥ॐउदा
नायस्वाहा॥ॐसमानायस्वाहा॥ततःषडंगेषडाहुति
दद्यात्॥अथबटुकदानबलि॥श्रीचक्रस्यईशानको
नेत्रिकोणवृत्तचतुस्रंचविधाय॥बटुकायनमःइति
संपूज्यततोबलिमंत्रः॥एह्येहिदेवीपुत्रबटुकनाथ

कपिलजटाभारत्रिभासुरत्रिनेत्रज्वालामुषसर्वविघ्नां
२५ नाशयसर्वोपचारसहितमिदंबलिगृह्णगृह्णस्वाहाः
वामांगुष्ठानामिकामुत्सृज्यबलीभक्षमोरक्ष ॥ अग्नि
कोणेत्रिकोणवृत्तचतुरस्रंकृत्वा ॥ यांयोगिनिभ्योनमः
॥ पूजाऽधर्वब्रह्मांडयादिविगगणतलेभूतलेनिष्कले
वापातालेचानलेवासलिलपवनयोयत्रकुत्रस्थितं
तत्क्षेत्रेपिठोपपीठादिषुचक्रतयदाधूपदीपादिकेन

प्रीतादेव्याःसदानःशुभबलिविधिनापातुवीरेंद्रविद्या
यांयोगिनीभ्योहंफट्स्वाहाः ॥ वामांगुष्ठमध्यमानामि
कामुत्सृज्य ॥ ततोनैरृत्येत्रिकोणवृत्तचतुरस्रं ॥ त्रैं क्षे
त्रपालायनमः ॥ क्षांक्षींक्षूंक्षैंक्षौंक्षंक्षःस्थानक्षेत्र
पालायधूपदीपसहितंबलिगृह्णश्च ॥ वामांगुष्ठानां
मिकाभ्यांउत्सृजेत् ॥ वायव्येत्रिकोणवृत्तंचतुरस्रंगं
णपतयेक्योनमः ॥ गांगींगूंगैंगौंगंः गणपतयेवरद

सर्वजनमेवस्यमानीयबलिंगृह्णगृह्णस्वाहाः॥गजतुंड
४६ मुद्रयाबलिंमुत्सृजेत्॥ततःस्वामेचतुस्रंकृत्वातत्र
साधारणबलिंस्थाप्य॥मूलेनाभिमंत्र्य॥क्लींव्यापकमंड
लायउंसर्वविघ्नकृत्यःसर्वेभ्योभूतेभ्योनमःस्वाहा॥
एषबलिसर्वेभ्योभूतेनमःस्वाहा॥इतिचतुस्रमुद्रयाऽत्
सृज्यइतिबुटकपंचबलिविधिः॥ततोआरार्तिकप्र ४६
ज्वाल्य॥क्लींश्रींग्लूंस्तौंस्त्रंक्रूंश्रींक्रंइत्यभिमंत्रमूलेनभि

मंत्र्यसंप्रोक्ष्य॥समस्तचक्रचक्रेशियुक्तेदेवीनमास्त
केआरार्तिकमिदंदेवीगृह्णतुत्रिपुरेश्वरीश्रीत्रिपुरेम
माभिषुसिद्ध्येनेवेदयामि॥मूलेनआरार्तिकंकृत्वा
॥ततोऋष्यादिषडंगंकृत्वा॥ध्यानं॥अष्टोत्तरशतंमे
त्रजपंकृत्वाजपसंकल्पं॥गुह्यातिगुह्यगोप्त्रत्वंगृ
हाणास्मत्कृतंजपं॥सिद्धिर्भवतुमेदेवीत्वत्प्रसादात्
सुरेश्वरी॥१॥जपसमर्प॥स्तुतिकुर्यात्॥किंकिंदुर्वे

दनुजदलीनीक्षीयतेनस्मृतायांकाकासिद्धिःसुरवर
५७ नुतेप्राप्यते॥नार्चितायां॥काकामूर्त्तिकुलकमलनी
प्राप्यतेनस्तुतायां॥कंकंयोगक्षयिविततुतेचित्तमा
नाधिताय॥१॥भक्तस्यप्रेनितापूजारक्तस्यपरमेश्व
री॥वाग्वादिनीमहासिद्धिदेहित्रिपुरसुंदरी३॥परमा
नंदसंदोहप्रमोदपरनिर्भरः॥दुःखत्रयपरिमाला ५७
नवदनंत्राहिमांशिवे४॥सद्भक्तेभवेसुखेदेवी५

त्रिपुरसुंदरी॥यथाशक्त्याजपंपूजागृहाणमदनुग्रहा
त्॥५॥द्रव्यहीनंक्रियाहीनंमंत्रहीनंचयद्भवेत्॥तत्
सर्वंकृपयादेवीक्षमस्वपरमेश्वरी॥६॥इतिपद्धति
समाप्तः॥ ॥ओंद्यौश्चमेगुरोश्चक्रंपश्चात्तीशः
प्रकीर्त्तितं॥ततोगुरुसमाख्यातोविष्णुलोकःपीता
महाः॥१॥सनकश्चसनंदश्चसनातनतनतःपरं॥
सनत्कुमारोरैवतदत्तात्रेयोस्ततःपरं॥२॥व्यासः

शुकोमहानंदःश्रीगौडेशततःपरं॥महामंगलयोगीशो
५८ परानंदस्ततःपरं॥३॥विश्वनाथमहानंदश्चिदानंदस्त
तःपरं॥शंकरश्चंद्रचूडश्चाज्ञेशनाथततःपरं॥४॥वि
द्यारंभोमहाकालःकुलंतस्यप्रकीर्तिताः॥एतानगुरु
सहस्त्रारेसम्यक्भ्रूचक्रेचिंतयेत्॥५॥इतिकुलगुरुः
॥अथगुरुपरंपराउच्यार॥आद्यौवेदांताचार्य॥१॥द्वि ५८
तीयब्रह्माचार्य२॥तृतीयविष्णवाचार्य३॥चतुर्थरुद्रा

चार्य४॥वशिष्ठपंचमाचार्य५॥शक्तिषष्ठाचार्यदृपा
राशरसप्तमाचार्य७॥व्यासाष्टमाचार्य८॥शुकनवमा
चार्य९गौडगोविंददशमाचार्य॥१०॥एकादशश्रीशं
कराचार्य॥११॥सत्ययुगमध्येआचार्य३ब्रह्माविष्णुरु
द्रत्रेतायुगेआचार्य३वशिष्ठशक्तिपाराशर॥द्वापरे
आचार्य३॥व्यासशुकदेव॥कलियुगेआचार्य३गौड
गोविंदश्रीशंकराचार्यशंकराचार्यस्यचत्वारिशिष्य

५ प्रथमस्वरूपाचार्यः १॥द्वितीयपद्माचार्यः २॥तृतीयन
५९ रात्रोटकाचार्य ३॥चतुर्थपृथ्विधराचार्यः ४॥पृथ्विधरा
चार्यस्यशिष्य ५॥ब्रह्मचैतन्य १सरस्वति २भारति ३पुरी
५ ब्रह्मचैतन्यस्यशिवचैतन्य॥शिवचैतन्यस्यआनंद
चैतन्यआनंदचैतन्यस्यदेवचैतन्यदेवचैतन्यस्यज
नार्दनचैतन्यदक्षिणाम्नायशृंगेरिमठभूरवारसाप्रदा ५९
य॥सरस्वतिभारथिपुरीपदरामेश्वरक्षेत्रआदिवारदे

वताकामाक्षादेवीशृंगीऋषीतुंगभद्रातीर्थजनार्दनचै
तन्यब्रह्मचारीगुरुत्रयपादुकाश्रीगुरुपरमगुरुप
रात्परगुरुमूलविद्यायालदित्रिवारं॥अथदेहादिव्यव
स्था॥अथस्थूलदेहअं १५॥लोहितवर्ण२साढेत्रिहस्त
परीमाण३पृथ्वीआपतेजवायुराकाश ४वाकपाणिपा
दपायुउपस्थं ५श्रोत्रत्वक्चक्षुजिह्वाघ्राण ६रजोगु
ण ७जागृदवस्था ८अकारसहितब्रह्मदेवत ९वैश्य

रिवाणि विराट १० क्रियाशक्ति ११ अन्नमय कोश ॥ सूक्ष्म
५० देह ॥ कं २५ ॥ १ पांडुरवर्ण २ अंगुष्ठप्रमाण ३ प्राणपान
व्यानोदानसमान ५ शब्दस्पर्शरूपरसगंध ५ वक्तव्या
दानगमनविसर्गानंद ६ सत्त्वगुण ७ ओंकारसहित ८
विष्णुदेवत ९ स्वप्नावस्था १० मध्यमावाणी ११ इच्छाश
क्तिमनोमय कोससूक्ष्मलिंगदेहे ॥ श्रीमद्वैरवत्रोत्तरप्रविल ५०
सच्चंद्रामृतंप्लावितंक्षेत्राधीश्वरयोगिनीगणमहासि

द्धैसमाराधितंआनंदागमकंमहासकमिदंसात्त्रि
खंडामृतं ॥ वंदेश्रीप्रथमंकरांबुजगतंपात्रंविशुद्धिप्र
दं ॥ ऐंआसनत्रायरफ्रलदेहंशोधयामिजुहोमिजुषस्व
जुषध्वंसामयिकेभ्यःअज्ञांगृह्णाप्रकाशरंदत्वाकु
लकुंडलनीजिह्वाग्रेमानी ॥ १ ॥ हैंसिंदूरसावहंदयि
तयादत्तंचप्रेमादिभिः ॥ किंचिच्चंचलरक्तपंकजदृशा
मानंदमाहेक्षितंवामेसांद्रविशुद्धिशुद्धकवलंपाणौ

महं

विधायास्त्रकं॥ वंदे पात्रंद्वितीयमधुनानंदैकसंवर्द्धनं
क्लींविघातत्रायसूक्ष्मदेहसोधयामीजुहोमिजुषस्व
परमामृतंजुषध्वं॥२॥ मकारसहितंवर्तुलंनीलवर्णं
आत्मसिकुसुमरूपमानंमसुरीकायांतमोगुणेश्वर
देवतंपत्रपंतिवाणिज्ञानमयकोत्रीसुषुप्तचक्रज्ञा
नशक्तिःसर्वाम्नायसर्वाम्नायकलाकलापकलितं ५१
कोतुहलोद्योतितं॥ चंद्रेंद्रमहेंद्रशंभुचरणब्रह्मा

दिभिःस्तोवितं॥ ध्यातंदेवगणैपदंमुनिगणैर्मोक्षार्थि
भिःसर्वदा॥ वंदे पात्रमहंतृतीयमधुनास्वास्यबोध
क्षमं॥ सोऽहंवितत्रायकारणदेहंशोधयामीजुहोमि
जुषस्वपरमामृतंजुषध्वं॥३॥ तूर्यावस्थाब्रह्मरूपके
वलचैतन्यअहमस्मिब्रह्माहमस्मिसर्वंखल्विदंब्र
ह्मपरावाचाआनंदमयकोशःसर्वशक्तिःसर्वगतदे
ह॥ सर्वमानंसर्ववर्णंआईमात्राआत्मेवेदंजगत्

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

सर्वं॥ मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूरितं मु
५२ द्रामैथुनधर्मकर्मनिरतं ज्ञानामृतेराश्रयं॥आचार्या
र्चितमर्घ्यभैरवकुलामांसेनचाप्लावितं पायात्तंचम
कारतत्त्वनिलयंपात्रंचतुर्थंनमः५॥ऐंक्लींसौंमहा
कारणदेहंशोधयामिजुहोमिजुषस्वपरामृतंजुष
ध्वं॥इतिसंपूर्णमिदंपुस्तकंरामचंद्रेणलिखितं॥अ ५२
थसंख्याग्रंथ ५१८ संवत् १९१२ नलनामसंवत्सरे